**ज्वरमातङ्गकेशरिरस** पु० ज्वर एव मातङ्गो गजस्तत्र केशरीव कर्म्म० ।

"पारदं गन्धकं चैव हरितालं समाच्चिकम् । कटुत्रयं तथा पथ्या चारौ द्वौ सैन्धवं तथा । निम्बस्य विषमुष्टेश्च वीजं चित्रकमेव च । एषां माषमितं भागं ग्राह्यं प्रति सुसंस्कृतम् । द्विमाषं कानकफलं विषञ्चापि द्विमाषिकम् । निर्गुण्डीस्वरसेनैव शोषयेत्तत् प्रयत्नतः । साद्धरक्तिप्रमाणेन वटी कार्य्या सुशोभना । सर्वज्वरहरी चैषा भेदिनी दोषनाशिनी । आमाजीर्णप्रशमनी कामला पाण्डुरोगहा । वह्निदीप्तिकरी चैषा जठरामयनाशिनी । उष्णोदकानुपानेन दातव्या हितकारिणी । भाषितो लोकनाथेन ज्वरमातङ्गकेशरी" भैषज्यर० उक्ते औषधभेदे ।

**ज्वरमुरारिरस** पु० ज्वरो मुर इवासुरभेदस्तस्यारिः कर्म्म० ।

"शुद्धसूतं शुद्धगन्धं विषञ्च दरदं पृथक् । कर्षप्रमाणं कर्षार्द्धं लवङ्गं मरिचं पलम् । शुद्धं कनकवीजञ्च पलद्वयमितं तथा । त्रिवृता कर्षमेकञ्च भावयेद्दन्तिकाद्रवैः । सप्तधा च ततः कार्य्या गुडीगुञ्जाद्वता शुभा । ज्वरमुरारिनामायं रसोज्वरकुलान्तकः । अत्यन्ताजीर्णपूर्णे च ज्वरे विष्टम्भसंयुते । सर्वाङ्गग्रहणीगुल्मे चामवातेऽस्त्रपित्तके । कासश्वासे यच्चरोगेऽप्युदरे सर्वसम्भवे । म्टभ्रस्यां सन्धिमज्जस्थे वाते शोथे च दुस्तरे । यकृति प्लीहरोगे च वातरोगे चिरोत्थिते । अष्टादश कुष्ठरोगे सिद्धो गुरुविनिर्म्मितः" भैषज्यर० उक्ते औषधभेदे ।

**ज्वरशूलहररस** पु० ज्वरस्य शूलं वेदनां हरति हृ—अच् कर्म्म०

"रसगन्धकयोः कृत्वा कज्जलीं भाण्डमध्यगाम् । तत्राधोवदनां ताम्रपात्रीं संरुध्य शोषयेत् । पादाङ्गुष्ठप्रमाणेन चुल्ल्यां ज्वालेन तां दहेत् । यामद्वयं ततस्तस्य रसपात्रं समाहरेत् । चूर्णयेद्रत्तियुगलं तृतीयं वा विचक्षणः । ताम्बूलीदलयोगेन दद्यात् सर्वज्वरेष्वसम् । जीरसैन्धवसंसिप्तवक्त्राय ज्वरिणे हितम् । स्वेदोद्गमो भवत्येव देवि ! सर्वेषु पाप्मसु । चातुर्थकादीन् विषमान् नवमागामिनं ज्वरम् । साधारणं सन्निपातं जयत्येष न संशयः । ज्वरशूलहरो नाम रसोऽयं समुदाहृतः" भैषजार० उक्ते औषधभेदे ।

**ज्वरसिंहरस** पु० ज्वरस्य तद्रूपगजस्य सिंह इव हन्तृत्वात् कर्म्म० । भैषज्यरत्नावल्युक्ते औषधभेदे । तल्लक्षणं यथा

"पारदं गन्धकं तालं भल्लातकमथैव च । वज्रीक्षीरसमायुक्तमेकत्र च विमर्दयेत् । मृत्तिकाभाजने स्थाप्य मुद्रितव्यं विचक्षणैः । अग्निं प्रज्वालयेत्तत्र प्रहरद्वय संख्यया । शीतलं खलयेत्तत्र भावना च प्रदीयते । भृङ्गराजरसैरत्र गण्डदूर्वाभवै रसैः । चित्रकस्य रसेनापि भावना दीयते पुनः । पश्चात्तच्चूर्णयेद्दृ यत्नात् कूपिकायाञ्च धारयेत् । ज्वर उत्पद्यते यस्य चतुर्थे चापरे पुनः । माषैकञ्च रसं देयं तत्क्षणान्नाशयेज्ज्वरम् । ज्वरशान्तेः परं पथ्यं देयं सन्नौदनः पयः । ज्वरसिंहरसो नाम सर्वज्वरविनाशनः" ।

**ज्वरहन्तृ** त्रि० ज्वरं हन्ति हन्—तृच् । ज्वरनाशके स्त्रियां ङीप् । सा च २मञ्जिष्ठायां राजनि० । [हारा० ।

**ज्वराग्नि** पु० ज्वरः अग्निरिव सन्तापकत्वात् । आभिमन्यौ

**ज्वराङ्कुशरस** पु० ज्वरस्य गजरूपस्य अङ्कुश इव प्रतिरोधकत्वात् कर्म्म० । भैषज्यर० उक्ते औषधभेदे स च नानाविधो यथा

"शुद्धं सूतं विषं गन्धं धूर्त्तवीजं त्रिभिः समम् । चतुर्णां द्विगुणं व्योषं चूर्णं गुञ्जाद्वयं हितम् । जम्बीरस्य च मज्जाभिरार्द्रकस्य रसैर्युतम् । ज्वराङ्कुशो रसो नाम्ना ज्वरान् सर्वान् निहन्ति वै । (व्योषं मिलित्वा द्विगुणम् ।) (अयं भेदि ज्वराङ्कुशो नाम्ना ख्यातः ।) अन्योऽपि तत्रैव उक्तो यथा "रसस्य द्विगुणं गन्धं गन्धतुल्यञ्च टङ्कनम् । रसतुल्यं विषं योज्यं मरिचं पञ्चधा विषात् । कट्फलं दन्तिवीजञ्च प्रत्येकं मरिचोन्मितम् । ज्वराङ्कुशो रसोह्येष चूर्णयेदतिचिक्कणम् । माषैकेन निहन्त्याशु ज्वरं जीर्णं त्रिदोषजम्" । अत्रानुकूपमात्रां शर्कारादीनां निपीय शिखिता किञ्चिज्जलं पिबेत् । अन्यविधोऽपि तत्रैवोक्तो यथा

"ताम्रकाद् द्विगुणं तालं मर्दयेत् सुषवीद्रवैः । प्रपुटेद्भूधरे शीते वज्रीक्षीरेण मर्दयेत् । प्रपुटेत् भूधरे पश्चात् पञ्चगुञ्जामितं भवेत् । आर्द्रकस्य रसेनैव सर्वज्वरनिकृन्तनः । ऐकाहिकम् द्व्याहिकञ्च त्र्याहिकं चातुराहिकम् । विषमञ्चापि शीताद्यं ज्वरं हन्ति ज्वराङ्कुशः" अन्यविधोऽपि तत्रैव "शुद्धसूतं तथा गन्धं कर्षमानं नयेद्बुधः । महौषधं टङ्कनञ्च हरितालं तथा विषम् । रसार्द्धं मर्दयेत् खल्वे भृङ्गराजरसेन तु । त्रिदिनं भावनां दत्त्वा चतुर्थे वटिकां ततः । कुर्य्याच्चणकमात्राञ्च पिप्पलीमधुसंयुताम् । एष ज्वराङ्कुशो नाम विषम-